अमलं।)अभ्रकम्। इत्यमरटीकायां रायमुकुटः॥ (अभ्रस्वजातत्वे प्रमाणं यथा, भावप्रकाशे।
"पुरा वधाय वृत्रस्य वज्रिणा वज्रमुद्धृतम्।
विस्फुलिङ्गास्ततस्तस्य गगने परिसर्पिताः॥
ते निपेतुर्घनध्वानाच्छिखरेषु महीभृताम्।
तेभ्य एव समुत्पन्नं तत्तद्गिरिषु चाभ्रकम्॥
तद्वज्रं वज्रजातत्वादभ्रमभ्ररवोद्भवात्॥"
अभ्रकशब्देऽस्य विवरणं ज्ञातव्यम्॥)

गिरिज्वरः, पुं, (गिरेः पर्व्वतस्य ज्वर इव तद्भेदकत्वात्। गिरिं ज्वरयतीति वा। ज्वर+णिच्+अच्।) वज्रः। इति शब्दरत्नावली॥

गिरितः, त्रि, (गिल+कर्म्मणि क्तः लस्य रत्वञ्च।) गिलितः। भक्षितः। इत्यमरटीकायां रायमुकुटः॥

गिरिधातुः, पुं, (गिरौ जात धातुः। शाकपार्थिववन्मध्यपदलोपिसमासः।) गैरिकम्। इति राजनिर्घण्टः॥

गिरिनिम्बः, पुं, (गिरिसम्भूतोनिम्ब इव।) महानिम्बवृक्षः। इति राजनिर्घण्टः॥

गिरिपीलुः, पुं, (गिरिसम्भूतः पिलुर्वृक्षविशेषः।) फल्गुवृक्षः। इति राजनिर्घण्टः॥

गिरिपुष्पकं, क्ली, (गिरिजातं पुष्पकम्।) शैलेयम्। इति राजनिर्घण्टः॥

गिरिप्रिया, स्त्री, (गिरिः पर्व्वतः प्रियो यस्याः अव्याहतविचरणायेति भावः।) चमरीगवी। इति राजनिर्घण्टः॥

गिरिभित्, [द्] पुं, (गिरिं भिनत्ति भित्वा उत्पद्यते इति। भिद्+क्विप्।) पाषाणभेदकवृक्षः। इति भावप्रकाशः॥

गिरिभूः, स्त्री, (गिरौ भवति उत्पद्यते इति। भू+क्विप्।) क्षुद्रपाषाणभेदाः। इति राजनिर्घण्टः॥ गिरेर्भूः। पर्व्वतभूमिः। (यथा, आर्य्यासप्तशत्याम्। ६१५।
"सकलकटकैकमल्लिनि!
कठिनीभूताशये शिखरदन्ति।
गिरिभुव इव तव मध्ये
मनः शिला समभवत्सखि!॥" * ॥
गिरेर्हिमालयात् हिमालयाधिष्ठातृदेवादित्यर्थः भवतीति। भू+क्विप्।) पार्व्वती॥

गिरिमल्लिका, स्त्री, (गिरौ जाता मल्लिकेव मध्यपदलोपिसमासः।) कुटजवृक्षः। इत्यमरः। २।४।६६॥ (यथास्याः पर्य्यायाः।
"वृत्सकः शक्रपर्य्यायो वत्सको गिरिमल्लिका।
कुटजस्तत्फलञ्चेन्द्रयवश्चापि कलिङ्गकः॥"
इति वैद्यकरत्नमालायाम्॥)

गिरिमानः, पुं, (गिरिरिव मानं परिमाणमस्य उच्छ्रयत्वेनेति शेषः।) हस्ती। इति शब्दरत्नावली॥

गिरिमृत्, [द्] स्त्री, (गिरेः पर्व्वतस्य मृत् मृत्तिका।) गैरिकम्। इति त्रिकाण्डशेषः। (व्यवहारोऽस्याः यथा,—
"गिरिमृच्चन्दननागरखटिकाशयोजितो वह्निर्लेपः।
कुरुते वचया मिश्रो लोचनमगदं न सन्देहः॥"
इति वैद्यकचक्रपाणिसंग्रहे नेत्ररोगाधिकारे॥)

गिरिमृद्भवं, क्ली, (गिरेर्मृदो मृत्तिकाया भवतीति। भू+अच्।) गैरिकम्। इति राजनिर्घण्टः॥

गिरिमेदः, पुं, (गिरेर्मेद इव।) विट्खदिरः। इति रत्नमाला॥ इरिमेद इति वा पाठः॥

गिरियकः, पुं, (गिरिं पर्व्वतमाश्रित्य आत्मनिर्म्माणतां याति प्राप्नोतीति। या+कः ततः संज्ञायां कन्।) गेन्दुकः। इति हेमचन्द्रः। ३। ३५३॥

गिरियाकः, पुं, (गिरिं गिरिमधिकृत्यात्मसत्तां यातीति। या+क्विप्। ततः संज्ञायां कन्।) गेन्दुकः। इति शब्दरत्नावली॥

गिरिवासी, [न्] पुं, (गिरौ गिरिमाश्रित्य वसतीति। वस्+णिनिः। गिरिं वासयति सुरभीकरोतीत्यर्थे। वस्+करोतेरर्थे णिच् णिनिः।) हस्तिकन्दः। इति राजनिर्घण्टः॥

गिरिशः, पुं, (गिरिराश्रयत्वेन वसतित्वेनास्त्यस्य इति। "लोमादिपामादिपिच्छादिभ्यः शनेलचः।" ५।२।१००। इति शः। यद्वा, गिरौ कैलासाख्यपर्व्वते आध्यात्मिकार्थे तु नित्यशुद्धमनसीत्यर्थः शेते विराजते इति। यद्वा, गिरिं त्रिगुणदृष्टात्मकं मनः श्यति तनूकरोति विशुद्धं करोति शरणागतभक्तसाधकानाम्। शो इत शयने शो वा यद्बहुलं छन्दसि वः। लोके तु छान्दसानां क्वचिद्भाषायामपि प्रयोग इति व्यासुमुखशिवदित्याह स्वामी।) शिवः। इत्यमरः। १।१।३३॥ (यथा, रघुः। २।४१।
"इति प्रगल्भं पुरुषाधिराजो
मृगाधिराजस्य वचो निशम्य।
प्रत्याहतास्त्रो गिरिशप्रभावात्
आत्मन्यवज्ञां शिथिलीचकार॥")

गिरिशालिनी, स्त्री, (गिरिं पर्व्वतसदृशं शालयते शोभयते इति। शल+णिच्+णिनिः नान्तत्वात् ङीप् च। गिरिं वालमधिकाकर्णं शलते स्नायते निजपत्त्रावयवेनेत्यर्थे। शल श्लाघायां+णिनिः ङीप् च।) अपराजिता। यथा,—
"पारिभद्रं पाटला च बकुलं गिरिशालिनी।"
इति वामनपुराणम्॥

गिरिशृङ्गः, पुं, (गिरेः शृङ्गमिवास्त्यस्येति अच्। शुण्डादण्डोत्तलनसमये शृङ्गसादृश्यादस्य तथात्वम्।) गणेशः। इति शब्दरत्नावली॥ (गिरेः शृङ्गमिति विग्रहे क्ली। पर्व्वतशेखरम्। यथा, महाभारते। ६।५६।१५।
"गजैर्निपतितैर्गौर्लैर्गिरिशृङ्गैरिवावृतः॥")

गिरिसारः, पुं, (गिरेः सार इव।) लौहम्। (यथा, गोः रामायणे। ६।७८।१६।
"तप्तधौतं विमलं गिरिसारमयं महत्।
शक्तं परमसंक्रुद्धो वालिपुत्त्रे न्यपातयत्॥")
वङ्गम्। मलयपर्व्वतः। मेदिनी। रे। २६१॥

गिरिसुता, स्त्री, (गिरेर्हिमालयपर्व्वताधिष्ठातुः सुता पुत्त्री।) पार्व्वती। यथा,—
"अवतु वो गिरिसुता शशिशर्त्तः प्रियतमा वसतु मे हृदि सदा भगवतः पदयुगम्॥"
इति छन्दोमञ्जरी॥
(तथाच पञ्चतन्त्रे। १। १७५।
"अत्तुं वाञ्छति शाम्भवो गणपतेराखुं क्षुधार्त्तः फणी
तञ्च क्रौञ्चरिपोः शिखी गिरिसुतासिंहोऽपि नागाशनम्॥"
गङ्गा। यथा, काशीखण्डे। २९। ५२।
"गुहाम्बिका गिरिसुता गोविन्दाङ्घ्रिसमुद्भवा॥")

गिरीशः, पुं, (गिरेः कैलासस्य ईशः।) शिवः। (यथा, वक्रोक्तिपञ्चाशिकायाम्। ३३।
"चिन्तामेऽत्र न वेश्मनि प्रियतमे किं चिन्तय स्थाणव-
श्यावज्ञीत्यद्रिसुतां जयत्यवतु वः स्वक्त्या गिरीशोऽनिशम्॥"
गिरीणां पर्व्वतानामीशः श्रेष्ठः।) हिमालयपर्व्वतः। (गिरां वाचां शास्त्राणां वा ईशः।) वृहस्पतिः। इति मेदिनी। शे। १६॥

गिलः, पुं, (गिल्+"इगुपधेति।" ३।१।१३५। इति कः।) जम्बीरः। इति शब्दचन्द्रिका॥

गिलग्राहः, पुं, (गिलं गृह्णाति गिलं यथा स्यात् तथा गिलेन गिलनेन वा गृह्णाति धारयति इति तात्पर्य्यार्थः। ग्रह्+अण्।) नक्रः। इति राजनिर्घण्टः॥

गिलनं, क्ली, (गिल्+भावे ल्युट्।) गिरणम्। भक्षणम्। इत्यमरटीका॥ (यथा, हारीते प्रथमे स्थाने प्रथमेऽध्याये।
"वर्णानां गिलनञ्चापि कारितं वाचितन्तथा।
नीचोच्चञ्चैव गम्भीरं वर्ण्णयेत् पाठकं सुधीः॥")

गिलिः, स्त्री, (गिल्+भावे इन्।) गिलनम्। इत्यमरटीका॥

गिलितं, त्रि, (गिल्+कर्म्मणि क्तः। गिलिर्जाताऽस्येति तारकादित्वादितजित्यर्थे।) भक्षितम्। इत्यमरः। ३।२।११०॥

गिष्णः, पुं, (गायति सामवेदं गायतीति वा। गै गाने+"इष्णो गादाभ्यां किद्वा।" इति उणादिकोषटीकाधृतसूत्रेण इष्णः। किद्भावपक्षे तु "गादाभ्यां इष्णुच्।" उणां। ३। १६। इति इष्णुच् प्रत्ययनिष्पन्नत्वात् गेष्णुरित्येवपदं स्यात्।) सामवेदवेत्ता। गायकः। इत्युणादिकोषः॥

गीः, [र्] स्त्री, (गॄ+सम्पदादित्वात् क्विप्।) वाक्यम्। सरस्वती। इत्यमरः। १।६।१॥

गीतं, क्ली, (गीयते इति। गै गाने+भावे क्तः।) गानम्। इत्यमरः। १।७।२५॥ तस्य लक्षणं यथा,
"धातुमातुसमायुक्तं गीतमित्युच्यते बुधैः।
तत्र नादात्मको धातुर्मातुरक्षरसञ्चयः॥" * ॥
तद्द्विविधं यथा,—
"गीतञ्च द्विविधं प्रोक्तं यन्त्रगात्रविभागतः।
यन्त्रं स्यादेणुवीणादि गात्रन्तु मुखजं मतम्॥"
अपि च।
"निबद्धमनिबद्धञ्च गीतं द्विविधमुच्यते।